सूतिकाऽग्निर्यदा चाग्निं संस्पृशेदग्निहोत्रिकम्। इष्टिरष्टाकपालेन कार्य्या चाग्निमतेऽग्नये। २२० अध्या० आपस्य दुहिता भार्य्या सहस्य परमा प्रिया। भूपतिर्भुवभर्त्ता चाजनयत् पावकं परम्! भूतानाञ्चापि सर्वेषां यं प्राहुः पावकं पतिम्। आत्मा भुवनभर्त्तेति सान्वयेषु द्विजातिषु। महताञ्चैव भूतानां सर्वेषामिह यः पतिः। भगवान् स महातेजा नित्यं चरति पावकः। अग्निर्गृहपतिर्नाम नित्यं यज्ञेषु पूज्यते। हुतं वहति यो हव्यमस्य लोकस्य पावकः। अपां गर्भो महाभागः सत्त्वभुग्यो महाद्भुतः। भूपतिर्भुवभर्त्ता च महतः पतिरुच्यते। दहन्मृतानि भूतानि तस्याग्निर्भरतोऽभवत्। अग्निष्टोमे च नियतः क्रतुश्रेष्ठो भरस्य तु। स वह्निः प्रथमो नित्यं देवैरन्विष्यते प्रभुः। आयान्तं नियतं दृष्ट्वा प्रविवेशार्णवं भयात्। देवास्तत्राधिगच्छन्ति मार्गमाणा यथादिशम्। दृष्ट्वा त्वग्निरथर्वाणं ततो वचनमब्रवीत्। देवानां वह हव्यं, त्वमहं वीर! सुदुर्बलः। अथ त्वं गच्छ मध्वक्षं प्रियमेतत् कुरुष्व मे। प्रेष्य चाग्निरथर्वाणमन्यं देशं ततोऽगमत्। मत्स्यास्तस्य समाचख्युः क्रुद्धस्तानग्निरब्रवीत्। भक्ष्या वै विविधैर्भावैर्भविष्यथ शरीरिणाम्। अथर्वाणं तथा चापि हव्यवाहोऽब्रवीद्वचः। अनुनीयमानो हि भृशं देववाक्याद्धि तेन सः। नैच्छद्वोढुं हविः सर्वं शरीरञ्चापि सोऽत्यजत्। स तच्छरीरं सन्त्यज्य प्रविवेश धरान्तदा। भूमिं स्पृष्ट्वाऽसृजद्धातून् पृथक् पृथगतीव हि। पूयात् स गन्धं तेजश्च अस्थिभ्यो देवदारु च। श्लेष्मणः स्फाटिकं तस्य पित्तान्मारकतं तथा। यकृत् कृष्णायसं तस्य त्रिभिरेव प्रभुः प्रजाः। नखास्तस्याभ्रपटलं शिराजालानि विद्रुमम्। शरीराद्विविधाश्चान्ये धातवोऽस्याभवन्नृप!। एवं त्यक्त्वा शरीरञ्च परमे तपसि स्थितः। भृग्वङ्गिरादिभिर्भूयस्तपसोत्थापितस्तदा। भृशं जज्वाल तेजस्वी तपसाप्यायितः शिखी। दृष्ट्वा ऋषिं भयाच्चापि प्रविवेश महार्णवम् तस्मिन्नष्टे जगद्भीतमथर्व्वाणमथाश्रितम्॥ अर्च्चयामासुरेवैनमथर्व्वाणं सुरादयः। अथर्व्वा त्वसृजल्लोकानात्मनालोक्य पावकम्। मिषतां सर्व्वभूतानामुन्ममाथ महार्णवम्। एवमग्निर्भगवता नष्टः पूर्व्वमथर्वणा। आहूतः सर्वभूतानां हव्यं वहति सर्वदा। एवं त्वजनयद्धिष्ण्यान् वेदोक्तान् विविधान् बहून्। विचरन् विविधान् देशान् भ्रममाणस्तु तत्र वै। सिन्धुं नदं पञ्चनदं देविकाऽथ सरस्वती। गङ्गा च शतकुम्भा च सरयूर्गण्डसाह्वया चर्म्मण्वती मही चैव मेध्या मेधातिथिस्तदा। ताम्रावती वेत्रवती नद्यस्तिस्रोऽथ कौशिकी। तमसा नर्मदा चैव नदी गोदावरी तथा। वेणोपवेणा भीमा च वडवा चैव भारत॥ भारती सुप्रयोगा च कावेरी सुर्मुरा तथा। तुङ्गवेणा कृष्णवेणा कपिला शोण एव च। एता नद्यस्तु धिष्ण्यानां मातरो याः प्रकीर्त्तिताः। अद्भुतस्य प्रिया भार्य्या तस्य पुत्त्रो विभूरसिः। यावन्तः पावकाः प्रोक्ता सोमास्तावन्त एव तु॥ अत्रेश्चाप्यन्वये जाता ब्रह्मणो मानसाः प्रजाः। अत्रिः पुत्त्रान् स्रष्टुकामांस्तानेवात्मन्यधारयत्। तस्य तद्ब्रह्मणः कायान्निर्हरन्ति हुताशनाः एवमेते महात्मानः कीर्त्तितास्तेऽग्नयो मया॥ अप्रमेया यथोत्पन्नाः श्रीमन्तस्तिमिरापहाः। अद्भुतस्य तु माहात्म्यं यथा वेदेषु कीर्त्तितम्। तादृशं विद्धि सर्व्वेषामेको ह्येष हुताशनः। एक एवैष भगवान् विज्ञेयः प्रथमोऽङ्गिराः। बहुधा निःसृतः कायात् ज्योतिष्टोमक्रतुर्यथा। इत्येष वंशः सुमहानग्नीनां कीर्त्तितोमया। योऽर्चितो विविधैर्मन्त्रैर्हव्यं वहति देहिनाम्। भा० व० मार्क० २२१ अध्या०।

साऽस्य देवतेति—ढक् आग्नेयमग्निदेवताके हविरादौ त्रि०। अग्निना दृष्टं साम ढक्। आग्नेयं साम। आग्नेयी ऋक् स्त्रि०। अग्नये हितं ढक्। आग्नेयमौषधम् त्रि०।

लौकिकप्रयोगानुसारेण "अङ्गेर्नलोपश्चेति" औणादिकसूत्रेण अग्निशब्दस्य व्युत्पत्तिर्दर्शिता वैदिकप्रयोगे तु अग्निशब्दस्य प्रवृत्तिनिमित्तभेदोपयोगिन्यो यास्केन बह्व्यो व्युत्पत्तयो दर्शिताः। यथा "अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति संनममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति" शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवतीति" अग्निमीळे इति"। अस्यायमर्थः। सामान्येन सर्व-देवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितमतोऽनुक्रमेण वक्ष्यामः। तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते। कस्मात्-प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत? इति प्रश्नस्याग्रणीरित्यादिकमुत्तरम्। देवसेनामग्रे स्वयं नयतीत्यग्रणीः। एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम्। तथा च ब्राह्मणान्तरम्। "अग्निर्वै देवानां सेनानीरिति"। एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति। "अग्नि-